শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে যুদ্ধকাণ্ডে

# ॥ ষটষষ্টিতমঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ ষটষষ্টিতমঃ সর্গঃ ॥

## কুম্ভকর্ণভযাৎ পলাযমানানাং ৱানরাণামঙ্গদেন প্রোৎসাহনমাৱাহনং চ কুম্ভকর্ণেন কপীনাং সংহারঃ পুনর্ৱানরসৈনিকানাং পলাযনমঙ্গদেন প্রবোধ্য তেষাং পুনঃ প্রত্যাৱর্তনং চ

স লঙ্ঘযিৎৱা প্রাকারং গিরিকূটোপমো মহান্।
নির্যযৌ নগরাৎ তূর্ণং কুম্ভকর্ণো মহাবলঃ ॥ **6.66.1** ॥

ননাদ চ মহানাদং সমুদ্রমভিনাদযন্।
ৱিজযন্নিৱ নির্ঘাতান্ ৱিধমন্নিৱ পর্ৱতান্॥ **6.66.2** ॥

তমৱধ্যং মঘৱতা যমেন ৱরুণেন ৱা।
প্রেক্ষ্য ভীমাক্ষমাযান্তং ৱানরা ৱিপ্রদুদ্রুৱুঃ ॥ **6.66.3** ॥

তাংস্তু ৱিপ্রদ্রুতান্ দৃষ্টৱা রাজপুত্রোঽঙ্গদোঽব্রৱীৎ।
নলং নীলং গৱাক্ষং চ কুমুদং চ মহাবলম্॥ **6.66.4** ॥

আত্মনস্তানি ৱিস্মৃত্য ৱীর্যাণ্যভিজনানি চ।
ক্ৱ গচ্ছত ভযত্রস্তাঃ প্রাকৃতা হরযো যথা॥ **6.66.5** ॥

সাধু সৌম্যা নিৱর্তধ্ৱং কিং প্রাণান্ পরিরক্ষথ।
নালং যুদ্ধায ৱৈ রক্ষো মহতীযং ৱিভীষিকা॥ **6.66.6** ॥

মহতীমুত্থিতামেনাং রাক্ষসানাং ৱিভীষিকাম্।
ৱিক্রমাদ্ ৱিধমিষ্যামো নিৱর্তধ্ৱং প্লৱঙ্গমাঃ॥ **6.66.7** ॥

কৃচ্ছ্রেণ তু সমাশ্বস্য সঙ্গম্য চ ততস্ততঃ।
বৃক্ষান্ গৃহীৎবা হরযঃ সম্প্রতস্থূ রণাজিরে॥ **6.66.8**॥

তে নিবর্ত্য তু সংরব্ধাঃ কুম্ভকর্ণং বনৌকসঃ।
নিজঘ্নুঃ পরমক্রুদ্ধাঃ সমদা ইব কুঞ্জরাঃ॥ **6.66.9**॥

প্রাংশুভির্গিরিশৃঙ্গৈশ্চ শিলাভিশ্চ মহাবলাঃ।
পাদপৈঃ পুষ্পিতাগ্রৈশ্চ হন্যমানো ন কম্পতে॥ **6.66.10**॥

তস্য গাত্রেষু পতিতা ভিদ্যন্তে বহবঃ শিলাঃ।
পাদপাঃ পুষ্পিতাগ্রাশ্চ ভগ্নাঃ পেতুর্মহীতলে॥ **6.66.11**॥

সোঽপি সৈন্যানি সঙ্ক্রুদ্ধো বানরাণাং মহৌজসাম্।
মমন্থ পরমাযত্তো বনান্যগ্নিরিবোত্থিতঃ॥ **6.66.12**॥

লোহিতার্দ্রাস্তু বহবঃ শেরতে বানরর্ষভাঃ।
নিরস্তাঃ পতিতা ভূমৌ তাম্রপুষ্পা ইব দ্রুমাঃ॥ **6.66.13**॥

লঙ্ঘযন্তঃ প্রধাবন্তো বানরা নাবলোকযন্।
কেচিৎ সমুদ্রে পতিতাঃ কেচিদ্ গগনমাস্থিতাঃ॥ **6.66.14**॥

বধ্যমানাস্তু তে বীরা রাক্ষসেন চ লীলযা।
সাগরং যেন তে তীর্ণাঃ পথা তেনৈব দুদ্রুবুঃ॥ **6.66.15**॥

তে স্থলানি তদা নিম্নং বিবর্ণবদনা ভযাৎ।
ঋক্ষা বৃক্ষান্ সমারূঢাঃ কেচিৎ পর্বতমাশ্রিতাঃ॥ **6.66.16**॥

মমজ্জুরর্ণবে কেচিদ্ গুহাঃ কেচিৎ সমাশ্রিতাঃ।
নিপেতুঃ কেচিদপরে কেচিন্নৈবাবতস্থিরে।
কেচিদ্ ভূমৌ নিপতিতাঃ কেচিৎ সুপ্তা মৃতা ইব॥ **6.66.17**॥

তান্ সমীক্ষ্যাঙ্গদো ভগ্নান্ ৱানরানিদমব্রৱীৎ।
অৱতিষ্ঠত যুধ্যামো নিৱর্তধ্ৱং প্লৱঙ্গমাঃ॥ **6.66.18**॥

ভগ্নানাং ৱো ন পশ্যামি পরিক্রম্য মহীমিমাম্।
স্থানং সর্ৱে নিৱর্তধ্ৱং কিং প্রাণান্ পরিরক্ষথ॥ **6.66.19**॥

নিরাযুধানাং ক্রমতামসঙ্গগতিপৌরুষাঃ।
দারা হ্যুপহসিষ্যন্তি স ৱৈ ঘাতঃ সুজীৱতাম্॥ **6.66.20**॥

কুলেষু জাতাঃ সর্ৱেঽস্মিন্ ৱিস্তীর্ণেষু মহৎসু চ।
ক্ব গচ্ছত ভযত্রস্তাঃ প্রাকৃতা হরযো যথা।
অনার্যাঃ খলু যদ্ভীতাস্ত্যক্ত্বা ৱীর্যং প্রধাৱত॥ **6.66.21**॥

ৱিকত্থনানি ৱো যানি ভৱদ্ভির্জনসংসদি।
তানি ৱঃ ক্ব নু যাতানি সোদগ্রাণি হিতানি চ॥ **6.66.22**॥

ভীরোঃ প্রৱাদাঃ শ্রূযন্তে যস্তু জীৱতি ধিক্কৃতঃ।
মার্গঃ সৎপুরুষৈর্জুষ্টঃ সেৱ্যতাং ত্যজ্যতাং ভযম্॥ **6.66.23**॥

শযামহে ৱা নিহতাঃ পৃথিৱ্যামল্পজীৱিতাঃ।
প্রাপ্নুযামো ব্রহ্মলোকং দুষ্প্রাপং চ কুযোধিভিঃ॥ **6.66.24**॥

অৱাপ্নুযামঃ কীর্তিং ৱা নিহৎৱা শত্রুমাহৱে।
নিহতা ৱীরলোকস্য ভোক্ষ্যামো ৱসু ৱানরাঃ॥ **6.66.25**॥

ন কুম্ভকর্ণঃ কাকুৎস্থং দৃষ্টৱা জীৱন্ গমিষ্যতি।
দীপ্যমানমিৱাসাদ্য পতঙ্গো জ্ৱলনং যথা॥ **6.66.26**॥

পলাযনেন চোদ্দিষ্টাঃ প্রাণান্ রক্ষামহে ৱযম্।
একেন বহৱো ভগ্না যশো নাশং গমিষ্যতি॥ **6.66.27**॥

এৱং ব্রুৱাণং তং শূরমঙ্গদং কনকাঙ্গদম্।
দ্রৱমাণাস্ততো ৱাক্যমূচুঃ শূরৱিগর্হিতম্॥ **6.66.28** ॥

কৃতং নঃ কদনং ঘোরং কুম্ভকর্ণেন রক্ষসা।
ন স্থানকালো গচ্ছামো দযিতং জীৱিতং হি নঃ॥ **6.66.29** ॥

এতাৱদুক্ত্বা ৱচনং সর্ৱে তে ভেজিরে দিশঃ।
ভীমং ভীমাক্ষমাযান্তং দৃষ্টৱা ৱানরযূথপাঃ॥ **6.66.30** ॥

দ্রৱমাণাস্তু তে ৱীরা অঙ্গদেন বলীমুখাঃ।
সান্ত্বনৈশ্চানুমানৈশ্চ ততঃ সর্ৱে নিৱর্তিতাঃ॥ **6.66.31** ॥

প্রহর্ষমুপনীতাশ্চ ৱালিপুত্রেণ ধীমতা।
আজ্ঞাপ্রতীক্ষাস্তস্থুশ্চ সর্ৱে ৱানরযূথপাঃ॥ **6.66.32** ॥

ঋষভশরভমৈন্দধূম্রনীলাঃ।
কুমুদসুষেণগৱাক্ষরম্ভতারাঃ।
দ্বিৱিদপনসৱাযুপুত্রমুখ্যা -
স্ত্বরিততরাভিমুখং রণং প্রযাতাঃ॥ **6.66.33** ॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে যুদ্ধকাণ্ডে ষটষষ্টিতমঃ সর্গঃ ॥